
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

E

दाखल क्र. 2646 विषय - वेद

नाव - ऐतरेय ब्राम्हण संप्तमपंचिका

लेखक / लिपीकार

पृष्ठ - 27 काळ - पूर्ण / अपूर्ण

M-2646

॥ अथसप्तमपंचिकाप्रारंभः ॥

श्रा॰ १

१

॥श्रीगणेशाय नमः॥ हरिः ॐ॥ ॥अथातः पशोर्विभक्तिस्तस्य
विभागं वक्ष्यामो हनू सजिह्वे प्रस्तोतुः श्येनं वक्ष उद्गातुः कंठः काकु
द्रः प्रतिहर्तुर्दक्षिणा श्रोणिर्होतुः सव्या ब्रह्मणो दक्षिणं सक्थि मै
त्रावरुणस्य सव्यं ब्राह्मणाच्छंसिनो दक्षिणं पार्श्वं सांसमध्वर्योः स
व्यमुपगातॄणां सव्यों सः प्रतिप्रस्थातुर्दक्षिणं दोर्नेष्टुः सव्यं पोतुर्द
क्षिण ऊरुरच्छावाकस्य सव्य आग्नीध्रस्य दक्षिणो बाहुरात्रेयस्य
सव्यः सदस्यस्य सदं चानूकं च गृहपतेर्दक्षिणौ पादौ गृहपतेर्व्रतप्र
दस्य सव्यौ पादौ गृहपतेर्भार्यायै व्रतप्रदस्यौष्ठ एनयोः साधारणे

तत्कथमस्याग्निहोत्रंस्यादित्यभिवान्यवत्सायाःपयसाजुहुयाद्यदिवैत
त्पयोयदभिवान्यवत्सायाअन्यद्दिवैतदग्निहोत्रंयत्सेतस्यापिवायतएवकु
तश्चपयसाजुहुयुरथाप्याहुरेवमेवैनानजस्रानजुहुतइंधीरन्नाशरी
राणामाहर्त्तारितियदिशरीराणिनविद्येरन्पर्णशरःषष्टिस्त्रीणिचश
तान्याहृत्यतेषांपुरुषरूपकमिवकृत्वातस्मिंस्तामावृतंकुर्युरथैनांछ
रीरैराहृतैःसंस्पर्श्योद्वासयेयुरध्यर्द्धशतंकार्येसक्थिनीद्विपंचाशेचवि
शेचोरूद्विपंचविंशेशीर्षंतुशिरस्युपरिदध्यात्सातत्रप्रायश्चित्तिः॥२॥
तद्याहुर्यस्याग्निहोत्र्युपावसृष्टादुह्यमानोपविशेत्कातत्रप्रायश्चित्तिरि
तितामभिमंत्रयेतयस्माद्भीषानिषीदसिततोनोअभयंकृधि॥पशून्नः

श्रा॰७

सर्वान्रगोपायनमोरुद्रायमील्हुषइतितामुत्थापयेदुरस्थाद्व्यदितिरायु

३ र्यशिपतावधातुइंद्रायरुएवतीभागंमित्रायवरुणायचेत्यथास्याउदपा

त्रमभ्यधसिंचमुखेचोपगृह्णीयादृथैनांब्राह्मणायदद्यात्सातत्रप्राय

श्चित्तिरुलदाकुर्यस्याग्निहोत्रमुपावसृष्टादुह्यमानावाश्येतकातत्रप्रा

यश्चित्तिरितिस्वधानायांहवाएषायजमानस्यप्रतिख्यायवाश्यतेता

मन्नमप्यादद्येच्छांत्यैशांतिर्वाअन्नंस्यवसाङ्गवतीहिभूयाइति

सातत्रप्रायश्चित्तिस्तदाकुर्य्यस्याग्निहोत्रमुपावसृष्टादुह्यमानास्पं

देतकातत्रप्रायश्चित्तिरितिसायन्नत्रस्कंदयेत्तदभिमृश्यजपेद्यदद्य ३

दुग्धंपृथिवीमसृक्षद्यदोषधीरत्यसृपद्यदापः।।पयोगृहेषुपयोऽघ्न्या

घ्यायांपयोवत्सेषुपयोअस्तुतन्मयीतितत्रयत्सरिशिद्धंस्यात्तिनजुहुयाद्यद्य
ठंहोमायस्याद्यद्युवैसर्वंसिद्धंस्याद्‌यथान्यामाजुहुयात्तांदुग्ध्वानेनजुहुयाद्या
त्वेवश्रद्धायेहोतव्यंसातत्रप्रायश्चित्तिः॥३१॥तदाहुर्यस्यसायंदुग्धंसान्ना
य्यंदुष्येद्वापहरेद्वाकातत्रप्रायश्चित्तिरितिप्रातर्दुग्धंद्वैधंकृत्वातस्यान्य
तरांभक्तिमातच्यतेनयजेतसातत्रप्रायश्चित्तिस्तदाहुर्यस्यप्रातर्दुग्धं
सान्नाय्यंदुष्येद्वापहरेद्वाकातत्रप्रायश्चित्तिरित्यैंद्रंवामाहेंद्रंवापुरोळाशं
तस्यस्थानेनिरुप्यतेनयजेतसातत्रप्रायश्चित्तिस्तदाहुर्यस्यसर्वमेवसा
नाय्यंदुष्येद्वापहरेद्वाकातत्रप्रायश्चित्तिरित्यैंद्रंवामाहेंद्रंवेतिसमानंसा
तत्रप्रायश्चित्तिस्तदाहुर्यस्यसर्वाण्येवहवींषिदुष्येयुर्वापहरेयुर्वाकातत्र

भा.८

×त४

प्रायश्चित्तिरित्याज्यस्यैनानियथादेवतंपरिकल्प्यतयाऽप्यहविषेस्यायज्ञेताति
४ न्याभिह्विमनुल्बणांतन्नीतयज्ञोयज्ञस्यप्रायश्चित्तिः॥४॥तदाकुर्यस्याग्नि
होत्रमधिश्रितममेध्यमापद्येतकातत्रप्रायश्चित्तिरितिसर्वमेवैनत्स्रुच्याभिप
र्यासिच्यप्राकुद्दृस्याहवनीयेहेतांसमिधमभ्यादधात्यथोत्तरेऽआहवनीय व
स्योल्मुंभस्मनिरूह्यजुहुयान्मनसावाप्राजापत्ययावर्चातिहुतंवाहुतंवस
यद्येकस्मिन्नुन्नीतेयदिद्वयोरेषएवकल्पस्तत्रेद्यपनयितुंशक्नुयान्निषि
च्येतदुष्टमदुष्टमभिपर्यासिच्यतस्ययथोन्नीतंस्यात्तथाजुहुयात्सा
तत्रप्रायश्चित्तिस्तदाकुर्यस्याग्निहोत्रमधिश्रितंस्कंदतिवाविष्यंदतेवा ४
कातत्रप्रायश्चित्तिरितितदद्भिरुपनिनयेच्छांत्येशांतिर्वाआपोथैनद्द

क्षिरेणन पाणिनाभिमृश्य जपति दिवंतृतीयं देवान्यज्ञो गात्ततो मा द्रविणमाष्टां
तरिक्षंतृतीयं पितॄन्यज्ञो गात्ततो मा द्रविणमाष्ट पृथिवींतृतीयं मनुष्यान्यज्ञो गात्त
तो मा द्रविणमाष्ट येयो राजसास्वकमितारजांसीतिवैस्वानरूणीमम्वं जपति वि
ष्णुर्वै यज्ञस्य दुरिष्टं पाति वरुणः स्विष्टं तयोरुभयोरवैशांस्यैस्वात्तत्र प्रायश्चि
५ त्तिरुदाकुर्यस्याग्निहोत्रमधिश्रितं प्राङुदायैस्वलुतेवापिवाश्रं शते कातत्र
प्रायश्चित्तिरितिसयद्युपनिवर्तयेत्स्वर्गाल्लोकाद्यजमानमावर्तयेद्दक्षिणास्मा
उपविशायैतमग्निहोत्रपरिशेषमाहरेयुस्तस्य यथोन्नीतीस्यात्तथा जुहु
यात्सा तत्र प्रायश्चित्तिरुदाकुरथ यदि स्त्रुग्भिद्येत कातत्र प्रायश्चित्तिरित्यन्यां
स्त्रुचमाहृत्य जुहुयादथैतां स्त्रुचं भिन्नामाहवनीये भ्यादध्यात्प्राग्दण्डां प्रस्य कू

५

पुष्करांसा तत्र प्रायश्चित्तिस्तदाकुर्यस्याहवनीये ह्यग्नि र्विद्येताथ गार्हपत्य उप
शाम्येत्का तत्र प्रायश्चित्तिरिति स यदि प्रांचमुद्धरेदायतनाच्यवेत यदपहत्स्यं व
मसुरवद्यज्ञं तन्वीतयन्मंथेद्भ्रातृव्यं यजमानस्य जनयेद्यदनुगमयेत्प्राणो
यजमानं जह्यात्सर्वमेवैनं सह भस्मानं समोप्य गार्हपत्यायतने निधायाथ या
प्रांचमाहवनीयमुद्धरेत्सो तत्र प्रायश्चित्तिः ॥ ५ ॥ तदाकुर्यस्याग्ना
वग्निमुद्धरेयुः का तत्र प्रायश्चित्तिरिति स यद्यनुपश्येदुद्धृत्यपूर्वमपरग्नि
द्ध्याद्यद्यनानुपश्येत्सोग्नयेग्निवतेष्टाकपालं पुरोडाशं निर्वपेत्तस्य या ५
ज्यानुवाक्ये अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निने त्स्याकूतिं वाहवनीये
जुहुयादग्नयेग्निवते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाकुर्यस्य गार्हपत्या

हवनीयौ मिथः संसृज्येयातां का तत्र प्रायश्चित्तिरिति सोऽग्नये वीतयेऽष्टाकपालं
पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अग्न आयाहि वीतये यो अग्निं देववी
तय इत्याहुतिं वाहवनीये जुहुयादग्नये वीतये स्वाहेति सा तत्र प्रायश्चित्ति
स्तद्दाहुर्यस्य सर्व एवाग्नयो मिथः संसृज्येरन्का तत्र प्रायश्चित्तिरिति सोऽग्न
ये विविचयेऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये स्वर्णवस्तोरुषसा
मरोचि त्वामग्ने मानुषीरीळते विशइत्याहुतिं वाहवनीये जुहुयादग्नये वि
विचये स्वाहेति सा तत्र प्रायश्चित्तिस्तद्दाहुर्यस्याग्नयोऽन्यैरग्निभिः संसृज्ये
रन्का तत्र प्रायश्चित्तिरिति सोऽग्नये क्षामवतेऽष्टाकपालं पुरोळाशं निर्वपेत्
तस्य याज्यानुवाक्ये अक्रंदग्निस्तनयन्निव द्यौर धा यथा नः पितरः परास इत्या
द

श्रा॰ ८

६

हुतिं वाहवनीये जुहुयादग्नये क्षामवते स्वाहेति सा तत्र प्रायश्चित्तिः ॥ द्या तद्दाकु
र्यस्याग्नयो ग्राम्येणाग्निना संदह्येरन्का तत्र प्रायश्चित्तिरिति सोऽग्नये संवर्गा
याष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये कुविलुनो गविष्टये मानो
अस्मिन्महाधन इत्याहुतिं वाहवनीये जुहुयादग्नये संवर्गाय स्वाहेति सा तत्र प्रायश्चि
त्तिस्तद्दा कुर्यस्याग्नयो दिव्येनाग्निना संसृज्येरन्का तत्र प्रायश्चित्तिरिति सोऽग्नये
प्सुमतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्येऽप्स्वग्ने सधिष्टव म
योदधे मेधिरः पूतदक्ष इत्याहुतिं वाहवनीये जुहुयादग्नये प्सुमते स्वाहेति सा त
त्र प्रायश्चित्तिस्तद्दा कुर्यस्याग्नयः शवाग्निना संसृज्येरन्का तत्र प्रायश्चित्ति ६
रिति सोऽग्नये शुचयेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्येऽग्निः

शुचिव्रततमऽउदग्नेशुचयस्त्ववेस्वाकूतिंवाहवनीयेजुहुयादग्नयेशुचयेस्वाहे
तिसातत्रप्रायश्चित्तिस्तद्दाकूर्यस्याग्नयऽआरण्येनाग्निनासंदह्येरन्कातत्रप्रा
यश्चित्तिरितिसमेवारोपयेदरणीवोल्मुकंवामोक्षयेद्यद्याहवनीयाद्युदिगाहे
पस्याद्युदिनशक्नुयात्सोग्नयेसंवर्गायाष्टाकपालंपुरोडाशंनिर्वपेत्तस्योक्ते
याज्यानुवाक्येआकूतिंवाहवनीयेजुहुयादग्नयेसंवर्गायस्वाहेतिसातत्रप्रा
यश्चित्तिः ७ ॥ तद्दाकूर्यआहिताग्निरुपवसथेश्रुकुर्वीतकातत्रप्रायश्चित्ति
रितिसोग्नयेव्रतभृतेष्टाकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येत्वमग्
ग्नेव्रतभृच्छुचिर्व्रतानिबिभ्रद्दूतपाअदब्धइत्याकूतिंवाहवनीयेजुहुयादग्नये
व्रतभृतेस्वाहेतिसातत्रप्रायश्चित्तिस्तद्दाकूर्यआहिताग्निरुपवसथेव्रस्यमा

श्रा॰ ८

८

पद्येतकालतत्रप्रायश्चित्तिरितिसोऽग्नयेव्रतपतयेऽष्टाकपालंपुरोडाशन्निर्वपेत्तस्ययाज्यानुवाक्येत्वमग्नेव्रतपाअसिऽआयद्योवयंप्रमिनामव्रतानीत्याऽऽहुतिंवाहवनीयेजुहुयादग्नयेव्रतपतयेस्वाहेतिसातत्रप्रायश्चित्तिस्सदाकुर्यआहिताग्निरमावास्यांपौर्णमासींवातीयात्कोतत्रप्रायश्चित्तिरितिसोऽग्नयेपथिकृतेऽष्टाकपालंपुरोडाशन्निर्वपेत्तस्ययाज्यानुवाक्येवेत्थाहिवेधोऽध्वनश्चादेवानामपिपंथामगन्मेत्याऽऽहुतिंवाहवनीयेजुहुयादग्नयेपथिकृतेस्वाहेतिसातत्रप्रायश्चित्तिस्सदाकुर्यस्यसर्वएवाग्नयउपशाम्येरन्कातत्रप्रायश्चित्तिरितिसोऽग्नयेतपस्वतेजनद्वतेपावकवतेऽष्टाकपालंपुरोडाशन्निर्वपेत्तस्ययाज्यानुवाक्येआयाहितपसाजनेष्वग्नेपावकोयाहितपसाजनेष्वित्याऽऽहुतिंवाहवनीयेजुहुया ८

व

ते

दग्नयेतप स्वञ्जनद्धतेपावकवतेस्वाहेतिसातत्रप्रायश्चित्तिः॥८॥तदाहुर्यआहिताग्नि
राग्रयणेनानिष्ट्वानवान्नंप्राश्नीयात्कातत्रप्रायश्चित्तिरितिसोग्नयेवैश्वानराय
द्वादशकपालंपुरोळाशन्निर्वपेत्तस्ययाज्यानुवाक्येवैश्वानरोऽजीजनत्पृष्टोदि
विपृष्टोअग्निःपृथिव्यामित्याहुतिंवाहवनीयेजुहुयादग्नयेवैश्वानरायस्वाहेति
सातत्रप्रायश्चित्तिस्तदाहुर्यआहिताग्निर्यद्विकपालंनश्येत्कातत्रप्रायश्चित्ति
रितिसोश्विभ्यांद्विकपालंपुरोळाशन्निर्वपेत्तस्ययाज्यानुवाक्येअश्विनाव
र्तिरस्मदागोमतानासत्यारथेनेत्याहुतिंवाहवनीयेजुहुयादश्विभ्यांस्वा
हेतिसातत्रप्रायश्चित्तिस्तदाहुर्यऽआहिताग्निर्यदिपवित्रंनश्येत्कातत्रप्रा
यश्चित्तिरितिसोग्नयेपवित्रवतेष्टाकपालंपुरोळाशन्निर्वपेत्तस्ययाज्यानुवा

क्येपवित्रं तेवितततंब्रह्मणास्पतेतस्योर्यवितततंदिवस्पदइत्याहुतिंवाहवनीयेजुहुया
दग्नयेपवित्रवतेस्वाहेतिसातत्रप्रायश्चित्तिस्त्तदाहुर्यआहिताग्निर्यदिहिरण्यं
नश्येत्कातत्रप्रायश्चित्तिरितिसोग्नयेहिरण्यवतेष्टाकपालंपुरोळाशन्निर्व
पेत्तस्ययाज्यानुवाक्येहिरण्यकेशोरजसोविसारआतेसुपर्णाअमिंतंएनं
चेरित्याहुतिंवाहवनीयेजुहुयादग्नयेहिरण्यवतेस्वाहेतिसातत्रप्रायश्चित्ति
स्तदाहुर्यआहिताग्निर्यदिप्रातरस्नातोग्निहोत्रंजुहुयात्कातत्रप्रायश्चित्तिरि
तिसोग्नयेवरुणायाष्टाकपालंपुरोळाशन्निर्वपेत्तस्ययाज्यानुवाक्येत्वंनो
अग्नेवरुणस्यविद्वान्त्सत्वंनोअग्नेवमोभवोतीत्याहुतिंवाहवनीयेजुहुयाद
ग्नयेवरुणायस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यआहिताग्निर्यदिसूतका

न्तंग्राम्भीयात्कातत्रप्रायश्चित्तिरितिसोग्नयेतंतुमतेष्टाकपालंपुरोळाशंनिर्वपे
तस्ययाज्यानुवाक्येतंतुंतन्वन्रजसोभानुमन्विह्यक्षानहोनह्यतनोतसोम्याइ
स्याकूतिंवाहवनीयेजुहुयादग्नयेतंतुमतेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाकुर्य
आहिताग्निश्चेन्मतश्शवंश्रुत्वाकातत्रप्रायश्चित्तिरितिसोग्नयेसुरभिमतेऽ
ष्टाकपालंपुरोळाशंनिर्वपेत्तस्ययाज्यानुवाक्येऽग्निर्होतान्यसीदद्यजीया
न्साधीमकर्द्देववीतिंनोअद्येत्याकूतिंवाहवनीयेजुहुयादग्नयेसुरभिमते
स्वाहेतिसातत्रप्रायश्चित्तिस्तदाकुर्यदाहिताग्निर्यस्यभार्यागौर्वायमौजन
येत्कातत्रप्रायश्चित्तिरितिसोग्नयेमरुत्वतेत्रयोदशाकपालंपुरोळाशंनिर्वपे
त्तस्ययाज्यानुवाक्येमरुतोयस्यहिक्षयेराइवेद्वरमाअहेवेत्याकूतिंवाहवनी

येजुऊयाद्ग्नयेमरुत्वतेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुरपत्नीकोप्यग्निहोत्र
६ माहरे३त्नाहरे३तुइति॥आहरेदित्याहुर्यदिनाहरेदनद्धापुरुषःकोनद्धापु
रुषइतिनदेवान्नपितॄन्नमनुष्याइतितस्मादपत्नीकोप्यग्निहोत्रमाहरेत्तदेषाभि
यज्ञगाथागीयते॥यजेत्सोत्रामण्यामपत्नीकोप्यसोमपः॥मातापितृभ्यामनृ
णार्थीयजेतेतिवचनाछ्रुतिरितितस्मात्सौत्रामण्यांयजेत॥६॥तदाहुर्वाचापत्नीको
ग्निहोत्रंकथमेवजुहोतीतिनिविष्टेमृतापत्नीनष्टावाग्निहोत्रंकथमग्निहोत्रं
जुहोतिपुत्रा न्पौत्रान्नप्तृनित्याहुरस्मिंश्चलोकेमुष्मिंश्चास्मिंल्लोकेयंस्वर्गे ७
स्वर्गेणस्वर्गंलोकमारूरोहेत्यमुष्यैवलोकस्यसंततिंधारयतियस्यैषांपत्नी
नैछेतस्मादपत्नीकस्याधानंकुर्वेस्यपत्नीकोग्निहोत्रंकथमग्निहोत्रंजुहोतिश्र

द्वा पत्नी सत्त्यं यजमानः श्रद्धा सत्त्यं तदित्युत्तमं मिथुनं श्रद्धया सत्त्येन मिथुनेन
स्वर्गांल्लोकांजयतीति ॥१०॥ तदाहुर्यद्दर्शपूर्णमासयोरुपवसति न ह वा अव्र
तस्य देवा हविरश्नंति तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति पूर्वां पौर्णमा
सीमुपवसेदिति पैंग्यमुत्तरामिति कौषीतकं या पूर्वा पौर्णमासी सानुमति
र्योत्तरा सा राका या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूर्यां पर्य
स्तमियादभ्युदियादिति सा तिथिः पूर्वां पौर्णमासीमुपवसेदनिर्ज्ञाय पुरस्ता
दमावास्यायां चंद्रमसं यदुपैति यद्यजेते तेन सोमं क्रीणंतीति नोत्तरामुत्तरा
मुपवसेदुत्तरां ह वै सोमो यजते सोमममनुदैवतमेतद्वै देवसोमं यच्चंद्रमा
स्तस्मादुत्तरामुपवसेत् ॥११॥ तदाहुर्यस्याग्निमनुद्धृतमादित्योभ्युदियाद्वा

श्रौ०

भ्यस्तमियाद्वाप्रणीतोवाप्राग्घोमादुपशाम्येत्कातत्रप्रायश्चित्तिरितिहिरण्यं
१० पुरस्कृत्यसायमुद्धरेऽज्योतिर्वैशुक्रंहिरण्यंज्योतिःशुक्रमसौतद्देवतऽज्योतिः
शुक्रंपश्यंनुद्धरतिरजतमंतर्द्धायप्रातरुद्धरेदेतद्वात्रिरूपंपुरासंभेदाच्छा
यानामाहवनीयमुद्धरेन्मृत्युर्वैतमश्छायातेनैवतऽज्योतिषामृत्युंतमश्छा
यांतरतिसातत्रप्रायश्चित्तिस्तदाहुर्यस्यगार्हपत्याहवनीयावंतरेणानोवा
रथोवाश्वावाप्रतिपद्येतकातत्रप्रायश्चित्तिरितिनैनमनसिकुर्यादित्याहु
रात्मन्यस्यहिताभवंतीतितत्त्वेवमनसिकुर्वीतगार्हपत्यादविछिन्नामुदक १०
धारांहरेत्तंतुंतन्वन्नृजसोभानुमन्विहीत्याहवनीयात्सातत्रप्रायश्चित्तिः
स्तदाहुःकथमग्नीनन्वाधानोन्वाहार्यपचनमाहारये३न्नाहारये३

न्न इति॥आहारयेदित्याहुःप्राणान्वाएषोभ्यात्मंधत्तेयोग्नीनाधत्तेतेषामेषो
न्नादतमोभवतियदन्वाहार्यपचनस्तस्मिंनेतामाहुतिंजुहोत्यग्नयेन्नादाया
न्नपतयेस्वाहेत्यन्नादोहान्नपतिर्भवात्यस्नुतेप्रजयान्नाद्यंयएवंवेदांतरेण
गार्हपत्याहवनीयोहोष्यन्संचरेतैतेनहवाएनंसंचरमाणमग्नयोविदु
रयमस्मासुहोष्यतीत्येतेनहवाअस्यसंचरमाणस्यगार्हपत्याहवनीयौ
पाप्मानमपहतःसोपहतपाप्मोर्ध्वःस्वर्गंलोकमेतीतिवैब्राह्मणमुदाहरंति
तदाहुःकथमग्नीन्प्रवत्स्यन्नुपतिष्ठेतप्रोष्यवाप्रत्येत्याहरहर्वेतितूष्णीमित्या
हुस्तूष्णींवैश्रेयसआकांक्षंतेथाप्याहुरहरहर्वाएतेयजमानस्याश्रद्धयो
ह्रासनात्स्रावनाद्बिभ्यतितानुपतिष्ठेतेवोभयंवोभयंमेस्त्वित्यभयंहैवा

श्री०७

११ स्मैभवस्यभत्यंहैवास्मैभवति॥३२॥ ॥इतिद्वात्रिंशोध्यायः॥ ॥हरिश्चंद्रोहवै
धसऐक्ष्वाकोराजापुत्रआसतस्यहशतंजायाबभूवुस्तासुपुत्रंनलेभेतस्य
हपर्वतनारदौगृहऊषतुःसहनारदंपप्रछयन्निमंपुत्रमिछंतियेविजानं
तियेचनन॥किंस्वित्पुत्रेणविंदतेतन्मआचक्ष्वनारदेतिसएकयापृष्टो
दशभिःप्रत्युवाच॥ऋणमस्मिन्संनयत्यमृतत्वंचगछति॥पितापुत्र
स्यजातस्यपश्येच्चेज्जीवतोमुखं॥यावंतःपृथिव्यांभोगायावंतोजात
वेदसि॥यावंतोअप्सुप्राणिनांभूयान्पुत्रेपितुस्ततः॥शश्वत्पुत्रेणपि ११
तरोत्याय न्बहुलंतमः॥आत्माहिजज्ञआत्मनःसइरावत्यतितारि
णी॥किंनुमलंकिमजिनंकिमुश्मश्रूणिकिंतपः॥पुत्रंब्रह्माणइछध्वंस

वैलोकोवदावदः॥अंनंहप्राणः॥शरणंहवासोरूपंहिरण्यंपशवोविवाहाः॥सखाह
जायारूपणंहदुहिताज्योतिर्हपुत्रःपरमेव्योमन्॥पतिर्जायांप्रविशतिगर्भोभू
त्वासमातरं॥तस्यांपुनर्नवोभूत्वादशमेमासिजायते॥तज्जायाजायाभवतियद
स्यांजायतेपुनः॥आभूतिरेषाभूतिर्बीजमेतन्निधीयते॥देवाश्चैतामृषय
श्चतेजःसमभरन्महत्॥देवामनुष्यानब्रुवन्नेषावोजननीपुनः॥नापुत्रस्य
लोकोस्तीतितत्सर्वेपशवोविदुः॥तस्मात्तुपुत्रोमातरंस्वसारंचाधिरोहति॥
एषपंथाउरुगायःसुशेवोयंपुत्रिणआक्रमंतेविशोकाः॥तंपश्यंतिपशवो
वयांसिचतस्मात्तेमात्रापिमिथुनीभवंतीतिहस्माआख्याय॥२॥अथैन
मुवाचवरुणंराजानमुपधावपुत्रोमेजायतांतेनत्वायजाइतितथेतिसवरु

७:३

१२ णंराजानमुपससारपुत्रोमेजायतांतेनत्वायजाइतितथेतितस्यहपुत्रोजज्ञेरोहितो
नामतंहोवाचाजनिवैतेपुत्रोयजस्वमानेनेतिसहोवाचयदावैपशुर्निर्दशोभवत्यथ
समेध्योभवतिनिर्दशोन्वस्त्वथत्वायजाइतितथेतिसहनिर्दशआसतंहोवाचनि
र्दशोन्वभूद्यजस्वमानेनेतिसहोवाचयदावैपशोर्दंताजायंतेथसमेध्योभवतिदं
तान्वस्यजायंतामथत्वायजाइतितथेतितस्यहदंताजज्ञिरेतंहोवाचाज्ञतवाअ
स्यदंतायजस्वमानेनेतिसहोवाचयदावैपशोर्दंताःपद्यंतेथसमेध्योभवतिदं
तान्वस्यपद्यंतामथत्वायजाइतितथेतितस्यहदंताःपेदिरेतंहोवाचापत्सतवा १२
अस्यदंतायजस्वमानेनेतिसहोवाचयदावैपशोर्दंताःपुनर्जायंतेतंहोवाचाज्ञ
तवाअस्यपुनर्दंतायजस्वमानेनेतिसहोवाचयदावैक्षत्रियःसान्नाहुकोभ
२ थसमेध्योभवतिदंतान्वस्यपुनर्जायंतामथत्वायजाइतितथेतितस्यहदंताःपुनर्जज्ञिरे २

वेस्य ध स॰ मेध्यो भवति सन्नाहन्नु प्राप्नोत्वथ त्वा यजा इति तथेति स ह सन्नाहं प्रापत्तं
होवाच सन्नाहन्नु प्राप्नोद्यजस्व माऽनेनेति स तथेत्युक्त्वा पुत्रमामंत्रयामास ततायं
वै मह्यं त्वामददाद्धंत त्वयाहमिमं यजा इति स ह नेत्युक्त्वा धनुरादायारण्यमपा
तस्थौ स संवत्सरमरण्ये चचार ॥४॥ अथ हैक्ष्वाकं वरुणो जग्राह तस्य होदरं ज
ज्ञे तदुह रोहितः शुश्राव सोरण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच ॥
नानाश्रांताय श्रीरस्तीति रोहित शुश्रुम ॥ पापो नृषद्वरो जन इंद्र इच्चरतः सखा
चरैवेति चरैवेति वै मा ब्राह्मणोवोचदिति ह ॥ द्वितीयं संवत्सरमरण्ये चचार सोर
ण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच ॥ पुष्पिण्यौ चरतो जंघे भूष्णु
रात्मा फलग्रहिः ॥ शेरेस्य सर्वे पाप्मानः श्रमेण प्रपथे हताश्चरैवेति चरैवेति वै

श्री ७

माब्राह्मणोवोचदितिह ॥ तृतीयंसंवत्सरमरण्येचचारसोरण्याद्ग्राममेयायतमिं
१२ द्रः पुरुषरूपेणपर्येत्योवाच ॥ आस्तेभगआसीनस्योर्ध्वः स्तिष्ठतितिष्ठतः ॥ शेते
निपद्यमानस्यचरातिचरतोभगश्चरैवेतिचरैवेतिवैमाब्राह्मणोवोचदितिह ॥
चतुर्थंसंवत्सरमरण्येचचारसोरण्याद्ग्राममेयायतमिंद्रः पुरुषरूपेणपर्येत्यो
वाच ॥ कलिः शयानोभवतिसंजिहानस्तुद्वापरः ॥ उत्तिष्ठंस्त्रेताभवतिकृतंसंपद्य
तेचरंश्चरैवेतिचरैवेतिवैमाब्राह्मणोवोचदितिह ॥ पंचमंसंवत्सरमरण्येच
चारसोरण्याद्ग्राममेयायतमिंद्रः पुरुषरूपेणपर्येत्योवाच ॥ चरन्वैमधुविंदति १२
चरंस्वादुमुदुंबरं ॥ सूर्यस्यपश्यश्रेमाणंयोनतंद्रयतेचरंश्चरैवेतिचरैवेतिवै
माब्राह्मणोवोचदितिह ॥ षष्ठंसंवत्सरमरण्येचचारसोजीगर्तंसौयवसिम

षिमशनयापरीतमरण्यउपेयायतस्यहत्रयःपुत्राआसुःशुनःपुछःशुनःशेपः
शुनोलांगूलइतितंहोवाचऋषेहंतेशतंददाम्यहमेषामेकेनात्मानंनिष्क्रीणा
इतिसज्येष्ठंपुत्रंनिगृह्णानउवाचनन्विममितिनोएवेमम्मितिकनिष्ठंमाता
तौहमध्यमेसंपादयांचक्रतुःशुनःशेपेतस्यहशतंदत्वासतमादायसोरण्या
ग्राममेयायसपितरमेत्योवाचततहंताहमनेनात्मानंनिष्क्रीणाइतिसव
रुणंराजानमुपससारानेनत्वायजाइतितथेतिभूयान्वैब्राह्मणःक्षत्रिया
दितिवरुणउवाचतस्माएतंराजसूयंयज्ञक्रतुंप्रोवाचतमेतमभिषेचनीये
पुरुषंपशुमालेभे॥१५॥तस्यहविश्वामित्रोहोतासीज्जमदग्नि[illegible]रध्वर्युर्व
सिष्ठोब्रह्मायास्यउद्गातातस्माउपाकृतायनियोक्तारंनविविदुःसहोवा

साजीगर्त्तः सौयवसिर्म्मह्यमपरंशतंदत्ताहमेनंनियोक्ष्यामीतितस्मात्रपरंश
तंददुः स्तंसनिनियोजतस्माउपाकृतायनियुक्तायाप्रीतायपर्यग्निकृतायवि
शसितारंनविविदुः सहोवाचाजीगर्त्तः सौयवसिर्मह्यमपरंशतंदत्ताहमेनं
विशसिष्यामीतितस्मात्रपरंशतंददुः सोसिन्निःशानएयायाथहशुनःशे
पईक्षांचक्रेमानुषमिववैमाविशसिष्यंतिहंताहंदेवताउपधावामीतिसप्रजा
पतिमेवप्रथमंदेवतानामुपससारकस्यनूनंकतमस्यामृतानामित्येतय
र्चातंप्रजापतिरुवाचाग्निर्वैदेवानांनेदिष्ठस्तमेवोपधावेतिसोग्निमुपससा १४
राग्नेर्वयंप्रथमस्यामृतानामित्येतयर्चातमग्निरुवाचसवितावैप्रसवाना
मीशेतमेवोपधावेतिससवितारमुपससाराभित्वादेवसवितरित्येतेनतृचे

नतंसपितोवाचवरुणायवैराज्ञेनियुक्तोस्मितमेवोपधावेतिसवरुणंराजानमु
पससारातउत्तराभिरेकत्रिंशतातंवरुणउवाचाग्निर्वैदेवानांमुखंसुहृदयत
मस्तंनुस्तुह्यथत्वोत्स्रक्ष्यामइतिसोग्निंतुष्टावातउत्तराभिर्द्वाविंशत्यातमग्नि
रुवाचविश्वान्नुदेवान्स्तुह्यथत्वोत्स्रक्ष्यामइतिसविश्वान्देवांस्तुष्टावनमो
महद्भ्योनमोअर्भकेभ्यइत्येतयर्चातंविश्वेदेवाऊचुरिंद्रोवैदेवानामोजिष्ठोब
लिष्ठःसहिष्ठःसत्तमःपारयिष्णुतमस्तंनुस्तुह्यथत्वोत्स्रक्ष्यामइतिसइंद्रं
तुष्टावयच्चिद्धिसत्यसोमपाइतिचैतेनसूक्तेनोत्तरस्यचपंचदशभिस्तस्मा
इंद्रःस्तूयमानःप्रीतोमनसाहिरण्यरथंददौतमेतयाप्रतीयायशश्वदिंद्र
इतितमिंद्रउवाचाश्विनोनुस्तुह्यथत्वोत्स्रक्ष्यामइतिसोश्विनोतुष्टावातउ

नरेणतृचेनतमश्विनावूचतुरुषसन्नुस्तुह्यथत्वोत्स्रक्ष्यामइतिसउषसंतुष्टावा
तउत्तरेणतृचेनतस्यहस्मऋच्यृच्युक्तायांविपाशोमुमुचेकनीयऐक्ष्वाकस्योदरं
भवत्युत्तमस्यामेवर्च्युक्तायांविपाशोमुमुचेगदऐक्ष्वाकआस॥६॥तमृत्वि
जऊचुस्त्वमेवनोस्याह्नःसंस्थामधिगच्छस्वेत्यथहैतंशुनःशेपोंजःसवंददर्श
तमेताभिश्चतसृभिरभिसुषावयच्चिद्धित्वंगृहेगृहइत्यथैनंद्रोणकलशम
भ्यववनिनायोच्छिष्टंचम्वोर्भरेत्येतयर्चाथहास्मिन्नन्वारब्धेपूर्वाभिश्चतसृ
भिःसस्वाहाकाराभिर्जुहवांचकाराथैनमवभृथमभ्यववनिनायत्वंनोअग्ने
वरुणस्यविद्वानित्येताभ्यामथैनमतऊर्ध्वमग्निमाहवनीयमुपस्थापयांच
कारशुनश्चिच्छेपंनिदितंसहस्रादित्यथहशुनःशेपोविश्वामित्रस्यांकमास

सादस होवाचाजीगर्त्तः सौयवसिर्ऋषे पुनर्मे पुत्रं देहीति नेति होवाच विश्वामित्रो दे
वावा इमं मह्यमरासतेति स ह देवरातो वैश्वामित्र आस तस्यैते कापिलेयबाभ्रवाः
स होवाचाजीगर्त्तः सौयवसिस्त्वं वेहि विह्वयावहा इति स होवाचाजीगर्त्तः सौयव
सिरांगिरसो जन्मनास्याजीगर्त्तिः श्रुतः कविः ॥ ऋषे पैतामहात्तंतोर्मापगाः
पुनरेहि मामिति स होवाच शुनःशेपोदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत ।
गवां त्रीणि शतानि त्वमवृणीथा मदंगिर इति स होवाचाजीगर्त्तः सौयवसि
स्तद्वै मा तात तपति पापं कर्म मया कृतं ॥ तदहं नि ह्नुवे तुभ्यं प्रतियंतु शता ग
वामिति स होवाच शुनःशेपो यः सकृत्पापकं कुर्यात्कुर्यादेनत्ततोपरं ॥ नापा
गाः शौद्रान्न्यायादसंधेयं त्वया कृतमित्यसंधेयमिति ह विश्वामित्र उपपपाद

ऐ॰ ७

१९ सहोवाच विश्वामित्रोभीमएव सोयवसिः शासेन विप्लिशाम्लिषु॥अस्थान्मेतस्यपु
त्रोभूर्मैवोपेहिपुत्रतामितिसहोवाच शुनःशेपःसवैयथानोज्ञपयाराजपुत्रत
थावद॥यथैवांगिरसःसन्नुपेयांतवपुत्रतामितिसहोवाचविश्वामित्रोज्येष्ठोमे
त्वंपुत्राणांस्यास्तवश्रेष्ठाप्रजास्यात्॥उपेयाद्देवंमेदायंतेनवैत्वोपमंत्रयइति
सहोवाचशुनःशेपःसंज्ञानानेषुवैब्रूयात्सौहार्दायमेश्रियै॥यथाहंभरत
ऋषभोपेयांतवपुत्रतामित्यथहविश्वामित्रःपुत्रानामंत्रयामाससमधुच्छंदाः
शृणोतनऋषभोरेणुरष्टकः॥येकेचभ्रातरस्थनास्मैज्यैष्ठ्यायकल्पध्वमि १६
ति॥७॥तस्यहविश्वामित्रस्यैकशतंपुत्राआसुःपंचाशदेवज्यायांसोमधुछं
दसःपंचाशत्कनीयांसःस्तद्येज्यायांसोनतेकुशलंमेनिरेताननुव्याजहारा

तान्वः प्रजाभक्षीष्टेतितएतेंध्राः पुंड्राः शबराः पुलिंदामूतिबाइत्युदंत्याबहवोभ
वंतिवैश्वामित्रादस्यूनांभूयिष्ठाः सहोवाचमधुछंदाः पंचाशतासार्द्धंयन्नः पि
तासंजानीतेतस्मिंस्तिष्ठामहेवयं॥ पुरस्त्वासर्वेकुर्महेत्वामन्वंचोवयंस्मसीत्य
थहविश्वामित्रः प्रतीतः पुत्रांस्तुष्टावतेवैपुत्राः पशुमंतोवीरवंतोभविष्यथ॥ ये
मानंमेनुगृह्णंतोवीरवंतमकर्त्तमा॥ पुरएत्रावीरवंतोदेवरातेनगाथिनाः॥
सर्वेराध्यास्थपुत्राएषवः सद्विवाचनं॥ एषवः कुशिकावीरोदेवरातस्तमन्वित॥
युष्मांश्चदायंमउपेताविद्यांयामुचविद्मसि॥ तेसम्यंचोवैश्वामित्राः सर्वेसा
कंसरातयः॥ देवरातायतस्थिरेधृत्यैश्रैष्ठ्यायगाथिनाः॥ अधीयतदेवरातो
रिक्थयोरुभयोरृषिः॥ जह्नूनांचाधिपत्येदैवेवेदेचगाथिनां॥ तदेतत्परऋ

ब्रा०७

ऐ० पा ऋच्छत गाथं शौनःशेपमाख्यानं तद्धोता राज्ञेऽभिषिक्तायाचष्टे हिरण्यकशिपावासी
नआचष्टे हिरण्यकशिँवासीनः प्रतिगृणाति यशो वै हिरण्यं यशसैवैनं तत्सम
र्धयत्योमित्यृचः प्रतिगर एवं तथेति गाथाया ॐ मिति वै दैवं तथेति मानु
षं दैवेन चैवैनं तन्मानुषेण च पापादेनसः प्रमुंचति तस्माद्यो राजा विजि
ती स्यादप्ययजमान आख्यापयेतैव तच्छौनःशेपमाख्यानं न हास्मिन्नल्पं
चनैनः परिशिष्यते सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्र एते चैवास
ने श्वेतश्चाश्वतरीरथो होतुः पुत्रकामा हाप्याख्यापयेरंल्लभंते ह पुत्रान्ल्
लभंते ह पुत्रान् ॥१८॥ ॥इति त्रयस्त्रिंशोध्यायः॥ ॥प्रजापतिर्यज्ञम
सृजत यज्ञंसृष्टमनु ब्रह्मक्षत्रे असृज्येतां ब्रह्मक्षत्रे अनु द्वय्यः प्रजा असृ ७७

ज्यंतकृताद्दश्राकृताद्दश्राब्रह्मैवानुकृताद्दः क्षत्रमन्वकृताद्दएतावैप्रजाअकृतादीय
ब्राह्मणाअथैताअकृतादीयद्रुजन्योवैश्यः शूद्रस्ताभ्योद्क्रामत्तंब्रह्मक्षत्रेअ प.ब्रा २
न्वैतांयान्येवब्रह्मणआयुधानितैर्ब्रह्मान्वैद्यानिक्षत्रस्यतैः क्षत्रमेतानिवैब्रह्म
णआयुधानियद्यज्ञायुधान्यथैतानिक्षत्रस्यायुधानियदश्वरथः कवचइषुध
न्वतंक्षत्रमनन्वाप्यन्यवर्त्ततायुधेभ्योहस्मास्यविजमानः पराङेवैत्यथैनंब्रह्मा
न्वैत्तमाप्नोत्तमाप्त्वापरस्तान्निरुध्यातिष्ठत्सआप्तः परस्तान्निरुद्धस्तिष्ठंज्ञात्वास्वा
न्यायुधानिब्रह्मोपावर्त्ततत्तस्माद्धाप्येतर्हियज्ञोब्रह्मण्येवब्राह्मणेषुप्रतिष्ठि
तोथैनंक्षत्रमन्वागछत्तदब्रवीदुपमास्मिन्यज्ञेह्वयस्वेतितत्तथेत्यब्रवीत्तद्वैनि
धायस्वान्यायुधानिब्रह्मणएवायुधैर्ब्रह्मणोरूपेणाब्रह्मभूत्वायज्ञमुपाव

तस्येति तथेति तत्क्षत्रं निधायस्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण
ब्रह्मभूत्वायज्ञमुपावर्त्तत तस्माद्धाप्येतर्हि क्षत्रियो यजमानो निधायैव स्वान्या
युधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्मभूत्वा यज्ञमुपावर्त्तते ॥ ९ ॥
अथातो देवयजनस्यैव याञ्चायस्तद्यदाकुर्य्याद्ब्राह्मणो राजन्यो वैश्यो दीक्षिष्यमाणः
क्षत्रियं देवयजनं याचति कं क्षत्रियो याचेदिति दैवं क्षत्रं याचेदित्याहुरादित्यो
वै दैवं क्षत्रमादित्य एषां भूतानामधिपतिः स यदहर्दीक्षिष्यमाणो भवति त
दहः पूर्वाह्ण एवोद्यन्तमादित्यमुपतिष्ठते इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं ॥ देवस
वितर्देवयजनं मे देहि देवयज्यायाइति देवयजनं याचति स यत्तत्र याचितउत्तरां
सर्पत्योंतथा ददामीति हैवतदाह तस्य हन कान्वन रिष्टिर्भवति देवेन सवित्रा ११

प्रसूतस्योत्तरोत्तरिणीं ह श्रियमश्नुतेऽश्नुते ह प्रजानामैश्वर्यमाधिपत्यं य एवमुपस्थाय या य
चिताद्देवयजनमध्यवसाय दीक्षते क्षत्रियस्सन् ॥२०॥ अथात इष्टापूर्त्तस्यापरिज्यानिः
क्षत्रियस्य यजमानस्य स पुरस्ताद्दीक्षाया आकूतिं जुहुयात्स्रुवगृहीतमाज्यमा
य हवनीय इष्टापूर्त्तस्यापरिज्यान्यै पुनर्न इन्द्रो मघवा ददातु ॥ ब्रह्म पुनरिष्टं पूर्त्तं दात्स्वा
हेत्यथानुबंध्यायै समिष्टयजुषामुपरिष्टात्पुनर्नो अग्निर्जातवेदा ददातु ॥ क्षत्रं पु
नरिष्टं पूर्त्तं दात्स्वाहेति सैषेष्टापूर्त्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य यद्देतेऽ
आकूती तस्मादेते होतव्ये ॥२१॥ तदु ह स्माह सौजात आराल्हिरजीतपुनर्वण्यं वा
एतद्यदेते आकूती इति यथा ह कामयेत तथैते कुर्याद्य इतोनुशासनं कुर्यादि
तीमे त्वेव जुहुयाद्ब्रह्म प्रपद्ये ब्रह्म मा क्षत्राद्गोपायतु ब्रह्मणे स्वाहेति तत्तदिति ॥२२॥ ॥

१७ ब्रह्मवाएषप्रपद्यतेयोयज्ञंप्रपद्यतेब्रह्मवैयज्ञोयज्ञादुहवाएषपुनर्जायतेयोदीक्षतेतंब्रह्म
प्रपन्नंक्षत्रंनपरिजिनातिब्रह्ममाक्षत्राद्गोपायत्वित्याहयथैनंब्रह्मक्षत्राद्गोपायेद्ब्रह्म
णेस्वाहेतितदेनत्प्रीणातितदेनत्प्रीतंक्षत्राद्गोपायत्यथानुबंध्यायैसमिष्टयजुषामु
परिष्टात्क्षत्रंप्रपद्येक्षत्रंमाब्रह्मणोगोपायतुक्षत्रायस्वाहेतितत्तदितीं क्षत्रंवाएष
प्रपद्यतेयोराष्ट्रंप्रपद्यतेक्षत्रंहिराष्ट्रंतंक्षत्रंप्रपन्नंब्रह्मनपरिजिनातिक्षत्रंमाब्रह्म
णोगोपायत्वित्याहयथैनंक्षत्रंब्रह्मणोगोपायेत्क्षत्रायस्वाहेतितदेनत्प्रीणाति
तदेनत्प्रीतंब्रह्मणोगोपायतिसैषेष्टापूर्तस्यैवापरिज्यानिःक्षत्रियस्ययजमान
स्ययदेतेआहुतीतस्मादेतेएवहोतव्ये॥२२॥अथेंद्रोवैदेवतयाक्षत्रियोभवतित्रैष्टु १७
भश्छंदसापंचदशस्तोमेनसोमोराज्येनराजन्योबंधुनासहदीक्षमाणएवब्राह्मणा

तामभ्युपैतियत्कृष्णाजिनमध्यूहतियद्दीक्षितव्रतंचरतियदेनंब्राह्मणाअभिसंगछंते
तस्यहदीक्षमाणस्येंद्रएवेंद्रियमादत्तेत्रिष्टु[illegible]ीर्यंपंचदशस्तोमआयुःसोमोराज्यंपित
रोयशःकीर्त्तिंमन्योवाअयमस्माद्भवतिब्रह्मवाअयंभवतिब्रह्मवाअयमुपावर्त्ततइ
तिवदंतःसपुरस्ताद्दीक्षायाआकूतिंकृत्वाहवनीयमुपतिष्ठेतत्वंइंद्रदेवतायाएमित्रि
ष्टुभश्छंदसोभिपंचदशास्तोमान्नसोमाद्राज्ञोनपित्र्याद्बंधोर्मामद्द्रंद्रुइंद्रियमादित
मात्रिष्टुद्वीर्यंमापंचदशस्तोमआयुर्मासोमोराज्यंमापितरोयशःकीर्त्तिंसहइंद्रिये
णवीर्येणायुषाराज्येनयशसाबंधुनाग्निंदेवतामुपैमिगायत्रींछंदस्त्रिवृतंस्तोमं
सोमंराजानंब्रह्मप्रपद्येब्राह्मणोभवामीतितस्यहनेंद्रइंद्रियमादत्तेनत्रिष्टुद्वीर्यं
नपंचदशस्तोमआयुर्नसोमोराज्यंनपितरोयशःकीर्त्तिंयएवमेतामाकूतिंकृत्वा

श्रा० ७

हवनीयमुपस्थायदीक्षतेक्षत्रियःसन्॥२४॥अथाग्नेयेयोवैदेवतयाक्षत्रियोदीक्षितो
२० भवतिगायत्रश्छंदसात्रिवृत्स्तोमेनब्राह्मणोबंधुनासहोद्रवस्यैनेवक्षत्रियतामभ्यु
पैतितस्यहोद्रवस्यतोग्निरेवतेजआदत्तेगायत्रीवीर्यंत्रिवृत्स्तोमआयुर्ब्राह्मणोब्र
ह्मयशःस्कीर्त्तिमन्योवाश्रयमस्मद्भवतिक्षत्रंवाअयंभवतिक्षत्रंवाअयमुपावर्त्त
तइतिवदंतःसोनूबंध्यायैसमिद्धयजुषामुपरिष्टाद्धुत्वा कुतिमाहवनीयमुप
तिष्ठेतनाग्नेर्देवतायाएमिनगायत्र्याश्छंदसोनत्रिवृतस्तोमान्नब्रह्मणोबंधो
र्म्मामेग्निस्तेजआदितमागायत्रीवीर्यंमात्रिवृत्स्तोमआयुर्म्माब्रह्मणाब्रह्मय २०
शःस्कीर्त्तिंसहतेजसावीर्येणायुषाब्रह्मणायशसाकीर्त्त्यैंद्रंदेवतामुपैमित्रिष्टुभंछं
राजानं दःपंचदशंस्तोमंसोमंक्षत्रंप्रपद्येक्षत्रियोभवामि॥देवाःपितरःपितरोदेवायोऽस्मि
१

ससन्यजे॥ स्वंमइदमिष्टंस्वंपूर्तंस्वंश्रांतंस्वंकृतं॥ तस्यमेयमग्निरुपद्रष्टायंवायुरु
पश्रोतासावादित्योनुख्यातेदमहंयएवास्मिसोस्मीतितस्यहनाग्निस्तेजआ
दत्तेनगायत्रीवीर्यंनत्रिरत्स्तोमआयुर्नब्राह्मणाब्रह्मयशस्कीर्तिंयएवमे
तामाकूतिंकृत्वाहवनीयमुपस्थायोद्वस्यतिक्षत्रियःसन्॥२४॥ अथा तो
दीक्षायाआवेदनस्यैवतदाकुर्य्याद्ब्राह्मणस्यदीक्षितस्यब्राह्मणोदीक्षिष्टेति
दीक्षामावेदयंतिकथंक्षत्रियस्यावेदये दितियथैवैतद्ब्राह्मणस्यदीक्षि
तस्यब्राह्मणोदीक्षिष्टेतिदीक्षामावेदयंत्येवमेवैतत्क्षत्रियस्यावेदयेत्पुरो
हितस्यार्षेयेणेतितत्तदिती३निधायवाएषस्वान्यायुधानिब्रह्मणएवायु
धैर्ब्रह्मणोरूपेणब्रह्मभूत्वायज्ञमुपावर्त्ततेतस्मात्पुरोहितस्यार्षेयेणादी तस्य

आ०७

२१ क्षामावेदयेयुः पुरोहितस्यार्षेयेणप्रवरंप्रवृणीरन्॥२५॥ अथातोयजमा
नभागस्यैवतदाहुः प्राश्नीयात्क्षत्रियोयजमानभागा३ं नप्राश्नीया३त्इति॥
यत्प्राश्नीयादहुताद्धुतंप्राश्यपापीयान्स्याद्यन्नप्राश्नीयाद्यज्ञादात्मानमं
तरियाद्यज्ञोवैयजमानभागःसब्रह्मणोपरिहर्त्यःपुरोहितायतनंवाएत
त्क्षत्रियस्ययद्ब्रह्मार्द्धमात्मोहवाएषक्षत्रियस्ययत्पुरोहितउपाहपरोक्षेणै
वप्राशितरूपमाप्नोतिनास्यप्रत्यक्षंभक्षितोभवतियज्ञउहवाएषप्रत्य
क्षंयद्ब्रह्माब्रह्मणिहिसर्वोयज्ञःप्रतिष्ठितोयज्ञेयजमानोयज्ञएवतद्य २१
ज्ञमप्यस्यजंतियथाप्स्वापोयथाग्नावग्निंतद्वैनातिरिच्यतेतदेनंनहिन
स्तितस्मात्सब्रह्मणोपरिहर्त्योऽग्नौहैकेजुह्वतिप्रजापतेर्विभान्नामलो

कस्तस्मिंस्स्याद्धास्मिंसहयजमानेनस्यादितितत्तथानकुर्याद्यजमानोवैयज
मानभागोयजमानंहसोग्नौप्रवृणक्तियएनंतत्रब्रूयाद्यजमानमग्नौप्राव
र्क्षीःप्रास्याग्निःप्राणांधक्ष्यतिमरिष्यतियजमानइतिशश्वत्तथास्यात्तस्मा
त्तस्याशान्नेयाद्दाशान्नेयात् ॥२६॥ ॥इतिचतुस्त्रिंशोध्यायः॥ ॥विश्वं
तरोहसौषद्मनःश्यापर्णान्परिचक्षाणोविश्यापर्णंयज्ञमाजह्रेतंहानुबु
ध्यश्यापर्णास्तंयज्ञमाजग्मुस्तेहतदंतर्वेद्यासांचक्रिरेतान्हदृष्ट्वोवाचपाप
स्यवाइमेकर्मणःकर्तारआसतेपूतायैवाचोवदितारोयच्छ्यापर्णाइमानुत्था
पयतेमेमेंतर्वेदिमासिषतेतितथेतितानुत्थापयांचक्रुस्तेहोत्थाप्यमानारु
रुविरेयेतेभ्योभूतवीरेभ्योसितमृगाःकश्यपानांसोमपीथमभिजिग्युःपा

रिक्षितस्यजनमेजयस्यविकश्यपेयज्ञेतेस्तेतत्रवीरवंतआसुःकश्चित्सोस्मा
२२ कास्तिवीरोयइमंसोमपीथमभिजेष्यतीत्ययमहमस्मिवोवीरइतिहोवाचरा
मोमार्गवेयोरामोहासमार्गवेयोनूचानश्यापर्णीयस्तेषांहोत्तिष्ठतामुवाचा
पिनुराजन्नित्थंविदंवेदेरुत्थापयंतीतियस्त्वंकथंवेत्थब्रह्मबंधविति॥२७॥
यत्रेंद्रंदेवताःपर्य्यवृंजन्विश्वरूपंत्वाष्ट्रमभ्यमंस्तवृत्रमस्तृततयतीन्सालावृके
भ्यःप्रादादरुर्मघानवधीद्बृहस्पतेःप्रत्यवधीदितितत्रेंद्रःसोमपीथेनव्यार्द्ध्यतें
द्रस्यानुव्यृद्धिंक्षत्रंसोमपीथेनव्यार्द्ध्यतापींद्रःसोमपीथेभवत्त्वष्टुरामुष्यसो २२
मंतद्व्यृद्धमेवाद्यापिक्षत्रंसोमपीथेनसयस्तंभक्षंविद्याद्यःक्षत्रस्यसोमपीथे
नव्यृद्धस्ययेनक्षत्रंसमृद्ध्यतेकथंतंवेदेरुत्थापयंतीतिवेत्थब्राह्मणत्वंतंभ

क्षां३वेदहीतितंवैनोब्राह्मणब्रूहीतितस्मैवैतेराजन्नितिहोवाच॥२९॥त्रयाणां
भक्षाणामेकमाहरिष्यंतिसोमंवा दधिवापोवासयदितिसोमंब्राह्मणानांस
भक्षोब्राह्मणांस्तेनभक्षेणजिन्विष्यसिब्राह्मणकल्पस्तेप्रजायामाजनिष्यत
आदाय्यापाय्यावसायीयथाकामप्रयाप्योयदावैक्षत्रियायपापंभवतिब्रा
ह्मणकल्पोस्यप्रजायामाजा यतईश्वरोहास्माद्द्वितीयोवातृतीयोवाब्रा
ण ह्मणतामभ्युपेतोः सब्रह्मबंधवेनजिज्यूषितोथयदिदधिवैश्यानांसभक्षो
वैश्यांस्तेनभक्षेणजिन्विष्यसिवैश्यकल्पस्तेप्रजायामाजनिष्यतेन्यस्यब
लिकृदन्यस्याद्योयथाकामज्येयोयदावैक्षत्रियायपापंभवतिवैश्यकल्पो
स्यप्रजायामाजा यतईश्वरोहास्माद्द्वितीयोवातृतीयोवावैश्यतामभ्यु

पैतोः स वैश्यतया जिज्यूषितोऽथ यद्यपः शूद्राणां स भक्षः शूद्रांस्तेन भक्षेण
जिन्वसि शूद्रकल्पस्ते प्रजायामाजनिष्यतेऽन्यस्य प्रेष्यः कामोत्थाप्यो य
थाकामवध्यो यदा वै क्षत्रियाय पापं भवति शूद्रकल्पोऽस्य प्रजायामाजा
यत ईश्वरो हास्माद्द्वितीयो वा तृतीयो वा शूद्रतामभ्युपैतोः स शूद्रतया
जिज्यूषितः ॥२९॥ ए ते वै ते त्रयो भक्षा राजन्निति होवाचाथ येषामाशां नेया
त्क्षत्रियो यजमानोऽथास्य स्वो भक्षो न्यग्रोधस्यावरोधाश्च फलानि चौ
दुंबराण्याश्वत्थानि प्लाक्षाण्यभिषुणुयात्तानि भक्षयेत्सोऽस्य स्वो भक्षो य
तो वा अधि देवा यज्ञेनेष्ट्वा स्वर्गं लोकमायंस्तत्रैतांश्चमसान्न्युब्जंस्ते न्यग्रो
धा अभवन्न्युब्जा इति हाप्येनानेतर्ह्याचक्षते कुरुक्षेत्रे ते ह प्रथमजा न्यग्रो

सानांतेभ्योहान्येधिजातास्तेयन्यंचोरोहंस्तस्मान्यङ्रोहतिन्यग्रोहोन्यग्रो
होवैनामतन्यग्रोहंसंतंन्यग्रोधइत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदे
वाः॥३॥तेषांयश्चमसानांरसोवाङैत्तेवरोधाअभवन्नथयऊर्ध्वस्तानिफ
लान्येषहवावक्षत्रियःस्वाद्भक्षान्नेतियोन्यग्रोधस्यावरोधांश्चफला
निचभक्षयत्युपाहपरोक्षेणैवसोमपीथमाप्नोतिनास्यप्रत्यक्षंभक्षितो
भवतिपरोक्षमिवहवाएषसोमोराजायन्न्यग्रोधःपरोक्षमिवैषब्रह्मणो
रूपमुपनिगच्छतियत्क्षत्रियःपुरोधयैवदीक्षयैवप्रवरेणैवक्षत्रंवाएतद्व
नस्पतीनांयन्न्यग्रोधःक्षत्रंराजन्योनिततइवहीहक्षत्रियोराष्ट्रेवसन्भव
तिप्रतिष्ठितइवनिततइवन्यग्रोधोवरोधैर्भूम्यांप्रतिष्ठितइवंतद्यत्क्षत्रि

यो यजमानो न्यग्रोधस्यावरोधांश्च फलानि च भक्षयत्यात्मन्येव तत्क्षत्रं वन
स्पतीनां प्रतिष्ठापयति क्षत्र आत्मानं क्षत्रे ह वै स आत्मनि क्षत्रं वनस्पती
नां प्रतिष्ठापयति न्यग्रोधस्यावरोधे भूम्यां प्रतितिष्ठत्युग्रं हास्य राष्ट्र
मव्यथ्यं भवति य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानः ॥३१॥ अथ य
दौदुंबराण्यूर्जो वा एषोन्नाद्याद्वनस्पतिरजायत यदुदुंबरो भौज्यं वा एत
द्वनस्पतीनामूर्जमेवास्मिंस्तदन्नाद्यं भौज्यं च वनस्पतीनां क्षत्रे दधात्य
थ यदाश्वत्थानि तेजसो वा एष वनस्पतिरजायत यदश्वत्थः साम्राज्यं 
वा एतद्वनस्पतीनां तेज एवास्मिंस्तत्साम्राज्यं च वनस्पतीनां क्षत्रे दधात्य
थ यत्प्लाक्षाणि यशसो वा एष वनस्पतिरजायत यत्प्लक्षः स्वाराज्यं च वा

हवाएतद्वैराज्यंचवनस्पतीनांयशएवास्मिंस्तत्स्वाराज्यंवैराज्येचवनस्पतीनां
क्षत्रेदधात्येतान्यस्यपुरस्तादुपक्लृप्तानिभवंत्यथसोमंराजानंक्रीणंतितिरा
हएवाव्रतोपवसथात्प्रतिवेशैश्चरंत्यथोपवसथ्यमहरेतान्यध्वर्युःपुर
स्तादुपकल्पयेतौधिषवणंचर्माधिषवणौफलकेद्रोणकलशंदशापवि
त्रमद्रीन्पूतभृतंचाधवनीयंचस्थालीमुदंचनंचमसंचतद्यदेतद्राजानं
प्रातरभिषुण्वंतितदेनानिद्वेधाविगृह्णीयादभ्यन्यानिसुनुयान्माध्यंदिनाया
न्यानिपरिशिंष्यात्॥३२॥तद्यत्रैतांश्चमसानुन्नयेयुस्तदेतंयजमानचमसमुन्न
येत्तस्मिन्द्दर्भतरुणकंप्रास्येत्तांतयोर्वषट्कृतेनःपरिधिपूर्वंप्रास्येद्दधि
क्राव्णोऽअकारिषमित्येतयर्चासस्वाहाकारयानुवषट्कृतेपरमोदधिक्राः

श्री॰ ९

२५ श्रवसापंचरुणी। इतितघ्नैतांश्चमसान्नाहरेयुस्तदेतंयजमानश्चमसमाहरेत्ता
न्यग्रोधस्तिमीयुस्तदेनमुपोदहन्तीयास्तिघदेवांहोतोपह्वयेतयदाचमसंभक्षयेद
थैनमेतयाभक्षयेद्धृहत्त्वशिष्टंराक्षसिनःसुतस्ययदिंद्रोअपिबच्छचीभिः॥इदंत
द्रस्यमनसाशिवेनसोमंराजानमिहभक्षयामीतिशिवोहवाअस्माएषवान
स्पत्यःशिवेनमनसाभक्षितोभवत्युग्रंहास्यराष्ट्रमव्यथ्यंभवतियएवमेतं
भक्षंभक्षयतिक्षत्रियोयजमानःशंनएधिहृदेपीतःप्रणआयुर्जीवसेसो
मतारीरित्यात्मनःप्रत्यभिमर्शईश्वरोहवाएषोप्रत्यभिमृष्टोमनुष्यस्या २५
युःप्रत्यवहर्तोरिनर्हन्माभक्षयतीतितद्धदेतेनात्मानमभिमृशत्यायुरेवतत्प्र
तिरतेआप्यायस्वसमेतुतेसंतेपयांसिसमुयंतुवाजाइतिचमससमाप्याययेत्

स्याभिरूपाभ्यांयद्यज्ञेभिरूपंतत्समृद्धं॥३॥तद्यत्रैतांश्चमसान्सादयेयुस्तदेतं
यजमानचमसंसादयेरथान्यत्रप्रकंपयेयुस्तदेनमनुप्रकंपयेदथैनमाहृतंभक्ष
येन्नाराशंसपीतस्यदेवसोमतेमतिविदऊमैःपितृभिर्भक्षितस्यभक्षयामीतिप्रा
तःसवनेनाराशंसोभक्षऊर्वैरितिमाध्यंदिनेकाव्यैरितितृतीयसवनऊ मा
वैपितरःप्रातःसवनऊर्वामाध्यंदिनेकाव्यास्तृतीयसवनेतदतत्पितॄनेवाम
तांत्सवनभाजःकरोतिसर्वोहैवसोमतइतिहस्माहप्रियव्रतःसोमापोयःक
श्चसवनभागित्यमृताहवाअस्यपितरःसवनभाजोभवंत्युपंहास्यराष्ट्रम
व्यथ्यंभवतियएवमेतंभक्षंभक्षयतिक्षत्रियोयजमानःसमानआत्मनःप्र
त्यभिमर्शःसमानमाप्यायनंचम सस्यप्रातःसवनस्येवाद्दताप्रातस्स

श्री ७

२६ मा पनेवरेयुर्माध्यंदिनस्यमाध्यंदिनेतृतीयसवनस्यतृतीयसवनेतमेवमेतंभक्षंप्रो
वाचरामोमार्गवेयोविश्वंतरायसौषद्मनायतस्मिन्होवाचप्रोक्तेसहस्रमुहब्राह्म
णातुभ्यंदद्मःसश्यापर्णाइमेयज्ञइत्येतमुहैवप्रोवाचतुरःकावषेयोजनमेज
यायपारिक्षितायेतमुहैवप्रोचतुःपर्वतनारदौसोमकायसाहदेव्यायसहदे
वायसार्ञ्जयायबभ्रवेदैवावृधायभीमायवैदर्भायनग्नजितेगांधारायेतमुहैवप्रो
वाचाग्निःसनश्रुतायारिंदमायक्रतुविदेजानकयएतमुहैवप्रोवाचवसिष्ठःसुदा
सेपैजवनायतेहतेसर्वएवमहज्जग्मुरेतंभक्षंभक्षयित्वासर्वेहैवमहाराजाआसु २६
रादित्यइवहस्मश्रियांप्रतिष्ठितास्तपंतिसर्वाभ्योदिग्भ्योबलिमावहंतआदित्य
इवहवैश्रियांप्रतिष्ठितस्तपतिसर्वाभ्योदिग्भ्योबलिमावहत्युग्रंहास्यराष्ट्रमव्यथ्यं

श्रौ० १

भवन्तिय एवमेतंभक्षंभक्ष यन्तिक्षत्रियोयजमानोयजमानः॥३४॥ ॥इति पं

२७ चत्रिंशोध्यायः॥ ॥इतिसप्तमपंचिकासमाप्तः॥ अथातस्तुतशस्त्रयोरेव॥

श्रीसवितासूर्यनारायणार्पणमस्तु॥श्रीकृष्णार्पणमस्तु॥श्रीशुभंभवतु॥

संवत् १८२९ शाके १६९४ वर्षे विकृतिनामसंवत्सरे दक्षिणायने शरदृतौ का

र्त्तिकशुक्लपक्षप्रतिपदायांभृगुवासरे चित्रानक्षत्रे तद्दिने इदंपुस्तकं तैत्तिळोप

नामकमहादेवभट्टात्मजगंगाधरेण लिखितं॥यादृशंपुस्तकंदृष्ट्वा तादृशंलि

खितंमया॥यदि शुद्धमशुद्धंवा मम दोषो न विद्यते॥ आंबेकर इत्युपनामकयाद २७

वभट्टस्यपुस्तकमिदं॥दत्तं समाप्तिमगमत्॥ ॥श्रीरामचंद्रायनमः॥ छ॥

॥इति सप्तमपंचिका समाप्तः॥

॥श्रीकेरयाग्वेदस्य पुस्तकं॥

[OrderDescription]
,CREATED=24.07.20 11:59
,TRANSFERRED=2020/07/24 at 12:05:42
,PAGES=53
,TYPE=STD
,NAME=S0003363
,Book Name=M-2646-ETREY BRAHAMAN SAPTAM PANCHIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF

FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF

FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,